M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 256

Title: Shantika Vidhi

256

(शान्तिक विधिः)

Shantika Vidhi	Title
	Author
	Editor
Sam. 1768	Year, Vols.
	Publisher
256	Remarks

अपसर्पंतु ये भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया। इति भूतत्रास
नं। अघोरं शिखां ह्रीं बध्वा। उदङ्मुखः स्वयं स्थित्वा प्राङ्मुखा ऋत्विजः। शांतिपाठं पठेयुः। गणाधिपं नमस्कृत्य नम
स्कृत्य पितामहं। विष्णुरुद्रं श्रियं देवीं वंदे भक्त्या सरस्वतीं।१ स्थानं क्षेत्रं नमस्कृत्य दिननाथं निशाक
रं। धरणीगर्भसंभूतं शशिपुत्रं बृहस्पतिं।२ दैत्याचार्यं नमस्कृत्य सूर्यपुत्रं शनैश्चरं। राहुं केतुं नम
स्कृत्य यज्ञारंभे विशेषतः।३ शक्रादिदेवताः सर्वा ऋषींश्चैव तपोधनान्। गर्गं मुनिं नमस्कृत्य नारदं
पर्वतं तथा।४ वसिष्ठं मुनिशार्दूलं विश्वामित्रं च गालवं। व्यासं कण्वमरीचीं क्रतुं देवलं गौतमं मंडपं पा॥
पा। अगस्त्यं च पुलस्त्यं च दक्षपुत्रं पराशरं। अन्ये विद्यातपोयुक्ता वेदशास्त्रविचक्षणाः।६ तान् सर्वान् प्र
णिपत्यादौ यज्ञरक्षां समर्थये।७ पतितं पंक्ति९

॥श्रीगणेशाय नमः॥ अथ शांतिकविधिर्लिख्यते॥ ।विवाहोत्सवमांगल्येषु जन्मे चैव प्रयो-
जने। प्रथमं शांतिकं कुर्यात् पश्चात् कर्म समाचरेत्॥१॥ तत्रायं प्रकारः। सर्वं मंडपकरणं। तत्र
मंडपे स्थंडिलद्वयं॥ कीदृशं ब्राह्मणे कुंडं कीदृशं क्षत्रिये च। कीदृशं वैश्यलोकस्य शूद्रस्य की-
दृशं भवेत्॥२॥ हस्तमात्रप्रमाणं तु विप्रस्य चतुरंगुलं। अंगुलाधिकहस्तं च क्षत्रियस्य यथा-
विधि॥३॥ अंगुलद्वयहस्तं च वैश्यस्य कथितं मया। हस्तांगुलं तु शूद्रस्य एतत् कुंडस्य लक्षणं।
॥४॥ कुंडस्य रुद्रदिग्भागे द्विहस्तं पीठमाचरेत्। किंचिन्मध्योन्नतं कार्यं मुष्टितं द्वादशांगुलं
॥५॥ त्रिंशांगुलं प्रकर्तव्यमंतरं कुंडपीठयोः। एतन्महर्षिभिः प्रोक्तं मानहीनाधिकं नहि॥
६॥ इति न्यायात् कुंडकरणं॥ ॥अथार्घस्थला॥ आपो दूर्वांकुशाग्राणि दधि चंदनमक्षताः
शमीक्षीरं च पुष्पं च। अष्टांगश्चार्घ उच्यते॥ अर्घं गृहीत्वा यजमानस्य उदङ्मुखाः प्राङ्मुखा वा
ब्राह्मणा बहिर्मंडपे स्थिताः शांतिपाठं पठंति॥ ॐ सुमुहूर्तं स्तेमंगुलं मं कल्याणमारोग्यं
शुभं भवतु। आशुः शिशान इत्यनुवाकः। सुशांतिर्भवतु॥ प्रयोगः। इह भुवनकोशेऽस्मिन् पृ-
थिव्यां भुवनपंकोजे भूर्लोके भारते खंडे जंबूद्वीपे आर्यावर्तांतर्गत ब्रह्मावर्तैकदेशे कुमारि-

का क्षेत्रे अर्बुदारण्ये महानद्याः साभ्रमत्याः पुण्यतटे श्रीविश्वेश्वरसंनिधौ श्रीविघ्नवि-
नायकसंनिधौ। अद्य श्रीब्रह्मणो द्वितीयप्रहरार्द्धे तदादौ श्रीश्वेतवाराहकल्पे वैव-
स्वतमन्वंतरे चतुर्युगानां अष्टाविंशतितमे कलियुगे प्रथमचरणे उन्नयतटे गृहाय-
तने गोमयेनोपलिप्तभूमिप्रदेशे देवब्राह्मणानां संनिधौ गतकलिचतुःसहस्राष्ट-
दशाधिकायां तदुपरि व्यतिक्रम्यमाणे श्रीमन्नृपविक्रमार्कसंवत्समदशायथा-
संख्याक वर्तमानसंवत्सरे अमुकनाम्नि संवत्सरे अमुकायने अमुकऋतौ अमुकमासे अ-
मुकपक्षे अमुकतिथौ। अमुकवासरे यथा वर्तमाननक्षत्रयोगकरणलग्नमुहूर्तसम-
वाये एवंगुणविशिष्टायां पुण्यतिथौ शास्त्रोक्तपुण्यफलावाप्त्यर्थं मम गृहे भूतभविष्य-
वर्तमानत्रिविधोत्पातशांत्यर्थं मम सुतस्य तथा मम सुतायाः पाणिग्रहणांगद्विनि-
मित्तं शुभशांतिकप्रारंभमहं करिष्ये॥ आचार्यप्रमुखेभ्यः ब्रह्मादीनामृत्विजां व्यपदेश-
पूर्वकमर्घसंपादनमहं करिष्ये। तु कुरुध्वं॥ ॥आदित्याद्या गृहाः सर्वे राहुकेतुपुरःसरा-
ः गृहदेवाधिदैवेभ्य नक्षत्राणां च दैवतैः। इंद्रादिभिश्च दिक्पालैर्ब्रह्मविष्णुमहेश्वरैः। वास्तु

दुर्गागणेशौ क्षेत्रपालादिभिस्तथा। भूम्यंतरिक्षदेवैश्च कुलदेव्याश्च मातृभिः॥ चतुर्भिश्च
वेदैर्वैश्व रूद्रेण सहितैस्तथा। सागरद्वीपपातालैः स्वर्गलोकसुरैः सह। पर्वतात्रृषिभिः
सर्वैर्गंगाद्याः सरितोद्रुमाः। मंत्रास्तिष्ठंति देवैश्च पाद्यमर्घ्यं ददाम्यहं॥ आयुरारोग्यपुत्रा
दिसुखश्रीप्राप्तये मम। आपद्विघ्नविनाशाय शत्रुबुद्धिक्षयाय च। विशेषकाम्यहोमेन
सहितं समिदादिभिः। नवग्रहमखं चैनं यूयं कर्तुं प्रसीदत। स्वागतं वो द्विजश्रेष्ठा मदनु
ग्रहकारकाः। इदमर्घ्यमिदं पाद्यं भवद्भिः प्रतिगृह्यतां॥ ॐ अर्घोऽयं प्रतिगृह्यतां। प्रतिगृ
ह्णामि। आचार्यस्त्वं यथा स्वर्गे शक्रादीनां बृहस्पतेः। तथा त्वं मम यज्ञेऽस्मिन्नाचार्योस्तु
द्विजोत्तम॥ १॥ अमुकगोत्रं अमुकप्रवरं शाखाध्यायिनं अमुकशर्माणं आचार्यं वृणे।
वृतोस्मि। आचार्याय एतद्वः पाद्यं। पादावनेजनं। पादप्रक्षालनं। अर्घः। इदमत्र चंदनं च
पुष्पं। इदमाचमनीयं। यथा चतुर्मुखो ब्रह्मा सर्ववेदपरायणः। तथा त्वं मम यज्ञेऽस्मिन् ब्र
ह्मा भव द्विजोत्तम॥ २॥ गोत्रोच्चारणं सर्ववत्। ब्रह्माणं वृतो। वृतोस्मि। ब्रह्मन्नेतत्ते पाद्यं। सर्व
वत्। चतुर्वेदाध्यायिभ्यः समस्तऋत्विग्भ्यो। एतद्वः पाद्यं। सर्ववत्। ततो यजमानेन स्वपादौ प्र

क्षाल्याचम्य। प्राणायामं। मंडपस्य मध्ये स्थंडिलसमये गत्वा। तत्रोपविश्य। आचम्य। सुजातो ज्योति
षा इति। यजमानस्य हस्ते कंकणवेष्टनं। दधिक्राव्णो इति दधिवंदनं। पुनंतु मा इति तर्जनं। या
फलिनी इति फलदानं। सर्वं बहिः शालादिकं कृत्वा। प्रतिष्ठाकरणं। ॐ तदस्तु तदग्ने शंयोरस्मभ्य
मिदमस्तु शस्तं। अस्मे महि गाधमुत प्रतिष्ठां नमो दिवे बृहते साधनाय॥ १॥ मनोजूतिरिति मंत्रः
ॐ मनोजूतिर्जुषतामाज्यस्येति मनसा वा इदं सर्वमाप्तं तेन मनसैवैनत्सर्वमाप्नोति। बृहस्पति
र्यज्ञमिमं तनोत्वरिष्टं यज्ञं समिमं दधात्विति यधिवृणं तद्रूपं दधाति विश्वेदेवास इह मादयं
तामिति सर्वे वै विश्वेदेवाः सर्वेणैवैतत्संदधाति॥ एष वै प्रतिष्ठानाम यज्ञो यत्रैतेन यज्ञेन यजं
ते। तेन सर्वमेव प्रतिष्ठितं भवति। बहिः शाला मंडपस्य प्रतिष्ठितां भवेतां॥ प्रयोगः समाप्तः॥
अथ वरुणश्राद्धं। आरभेत्। आचमनं। प्राणायामं। स्वस्तिन इति दिग्बंधः। वरुणं गोपकल्पितो
पहाराणां। सर्वेषां पवित्रतास्तु। देशकालपाकपात्रोपहारसंपदस्तु। अद्येत्यादि प्रयोगः
एवंगुणविशिष्टायां पुण्यतिथौ। आचार्यप्रमुखेभ्यः ब्रह्मादीनां ऋत्विजां वरणार्चनमहं करि।

ये।उकुरुष्व।इदमत्र।आचार्यायइदमासनं।ब्रह्मणेइदमासनं।समस्तऋत्विग्भ्यइदमासनं।इदमत्रचंदनं
चपुष्पं।यथादत्तंगंधाद्यर्चनंआचार्यप्रमुखेभ्यःब्रह्मादीनांऋत्विजांअर्चनःप्रियतां।कुंडलमुद्रिकावा
सांसियज्ञोपवीतप्रत्याम्नायेइदंद्रव्यं।आचार्यप्रमुखेभ्यःब्रह्मादीनांऋत्विजांयजमानोदास्ये।योय
स्यविभागःसहप्रतिगृह्यतां।प्रतिगृह्णामि।अत्रचंदनगंधपुष्पधूपदीपादीनांप्रदानात्इदमर्चितंवो
ऽस्तुनिसर्पज्योतिःपुष्पं।अस्यवरुणस्थापनार्चनविधेःपरिपूर्णतामस्तु।आचमनंयथादास्यमाना
निब्राह्मणभोजनानि।आचार्यप्रमुखेभ्यःब्रह्मादीनामृत्विजांयजमानोदास्ये।योयस्यविभागःसहप्र
तिगृह्यतांप्रतिगृह्णामि।सुप्रोक्षितोयंदेशोस्तु।शिवाआपःसंतु।सौमनस्यंपुष्पमस्तु।अक्षतंचारिष्टं
हंतु।यजमानकुलेसपरिवाराणांदीर्घमायुरस्तु।शांतिरस्तु।पुष्टिरस्तु।वृद्धिरस्तु।यच्छ्रेयंतदस्तु।द्विप
दचतुष्पदेभ्यःगृहेलक्ष्मीधनेधान्येव्यापारेसमृद्धिरस्तु।सुशांतिर्भवतु।अस्यवरुणस्थापनप्रतिष्ठा
सिद्ध्यर्थं।दक्षिणामुखवासनांहस्तेचहस्तेभ्योव्रतेभ्योब्राह्मणेभ्योहंसंप्रदास्ये।योयस्यविभागःसहप्र
तिगृह्यतां।प्रतिगृह्णामि।अस्यवरुणस्थापनार्चनविधेःयन्न्यूनंअतिरिक्तंतत्सर्वंभवतांप्रसादात्परि ३

पूर्णमस्तु॥ ॥इतिवरुणस्थापनसमाप्तं॥ ॥अथस्वस्तिवाचनंलिख्यते॥संपूज्यगंधमाल्याद्यैर्ब्राह्मणान्स्व
स्तिवाचयेत्।धिरस्मरंप्रशासंति।धर्मकर्माणिमांगल्येसंग्रामाद्भुतदर्शने॥१॥पुण्याहवाचनेदैवेब्रा
ह्मणस्यविधीयते।एतदेवनिरोंकारंकुर्यात्क्षत्रियवैश्ययोः॥२॥अवनिकृतजानुमंडलंकमलमुकु
लसदृशमंजलिंशिरस्याधाय।दक्षिणेनपाणिनासुवर्णपूर्णकलशंधारयित्वादीर्घानागानद्योगि
रयस्त्रीणिविष्णुपदानिचतेनायुःप्रमाणेनपुण्याहंदीर्घमायुरस्तु।शिवाआपःसंतु।सौमनस्यमस्तु
।अक्षतंचारिष्टंचास्तु।गंधाःपांतु।मांगल्यंचास्तु।पुष्पाणिपांतुसुश्रियमस्तु।अक्षताःपांतुआयुष्यम
स्तु।तांबूलानिपांतुऐश्वर्यमस्तु।दक्षिणाःपांतुआरोग्यमस्तुदीर्घमायुःपुष्टितुष्टिश्रीर्यशोविनयोवि
द्यंबहुपुत्रंबहुधनंचास्तु।यंकृत्वासर्ववेद।यज्ञक्रियाकरणकर्मारंभाःशुभाःशोभनाःप्रवर्तंतेतमह
मोंकारमादिंकृत्वाऋग्यजुःसामाशीर्वचनंबहुऋषिमतंसमनुज्ञातंभवद्भिरनुज्ञातःपुण्यंपुण्याहंवा
चयिष्ये।वाच्यतां॥ ॥द्रविणोदाःद्रविणसस्तुरस्यद्रविणोदाःसनरस्यप्रयंसत्।द्रविणोदावीरवतीमि
षंनोद्रविणोदारासतेदीर्घमायुः॥१॥द्रविदारत्वा।मंत्र॥द्रविदाःपीपिषति।जुहोतप्रचतिष्ठत।नेष्ठाद्रुतुभि
रिष्यत॥१॥उसवितापश्चातात्सवितापुरस्तात्सवितोत्तरात्तात्सविताधरात्तात्।सवितानःसुवतुसर्वताति॥
सवितानोरासतांदीर्घमायुः॥२॥सवितारत्वा।मंत्र।सवितात्वासवानां।सुमतामग्नीर्गृहपतिनां।सोमोवनस्पति

१४ तीनाम्। बृहस्पतिर्वाचे ज्येष्ठ्याय। रुद्रः पशुभ्यो। मित्रः सत्यो वरुणो धर्मपतीनाम्। २। उ नवो नवो भवति जा

यमानो ऽह्नां केतुरुषसामेत्यग्रम्। भागं देवेभ्यो विदधात्यायंनः प्रचंद्रमास्तिरते दीर्घमायुः। ३॥ नवो नवो भ
वतिरचा। मंत्रा ५ नन्दस्ता ८ सिनपिशा ब्राह्मरंति देवाना मोजः प्रथमजं ८ ह्येतत्। यो बिभर्ति दाक्षायणं ८ ४
इत्येताश्चः पुण्याहे ब्रूयात्। व्रतनियमतपःस्वाध्यायक्रतुदमदानविशिष्टानां सर्वेषां ब्राह्मणानां मनः स
माधीयतां समाहितमनसः स्मः। प्रसीदन्तु भवंतु। प्रसन्नाः स्मः। शांतिरस्तु। पुष्टिरस्तु। तुष्टिरस्तु। वृद्धिरस्तु॥
ऋद्धिरस्तु। अविघ्नमस्तु। आयुष्यमस्तु। आरोग्यमस्तु। शिवमस्तु। शिवं कर्मास्तु। कर्मसमृद्धिरस्तु। पुत्रसमृ
द्धिरस्तु वेदसमृद्धिरस्तु शास्त्रसमृद्धिरस्तु। धनधान्यसमृद्धिरस्तु। इष्टसंपदस्तु। अनिष्टनिरसनमस्तु। यत्पा
पं रोगदोषो अशुभं अकल्याणं तद्दूरे प्रतिहतमस्तु। यच्छ्रेयस्तदस्तु। उत्तरे कर्मणि निर्विघ्नमस्तु। उत्तरो
त्तरमहरहः सिद्धिरस्तु। उत्तरोत्तरक्रियाः शुभाः शोभनाः संपद्यंतां। तिथिकरणमुहूर्तनक्षत्रसंपदस्तु। ति
थिकरणमुहूर्तनक्षत्रग्रहाधिदेवताः प्रीयंतां। तिथिकरणे मुहूर्ते सनक्षत्रे सग्रहे सदैवते प्रीयेतां। अग्निपु
रोगा विश्वेदेवाः प्रीयंतां। इंद्रपुरोगा मरुद्गणाः प्रीयंतां। वसिष्ठपुरोगा ऋषिगणाः प्रीयंतां। महेश्वरपु
रोगा उमामातरः प्रीयंतां। अरुंधतीपुरोगा एकपत्न्यः प्रीयंतां। विष्णुपुरोगाः सर्वे देवाः प्रीयंतां। ब्रह्म
पुरोगाः सर्वे वेदाः प्रीयंतां। ब्रह्म च ब्राह्मणाश्च प्रीयंतां। श्रीसरस्वत्यौ प्रीयेतां। श्रद्धामेधे प्रीयेतां। भगव ५

हिरण्य ८ स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः। ३। उच्चा दिवि दक्षिणावंतो अस्थुर्ये अश्वदाः सह ते
हिरण्यदा अमृतत्वं भजंते वासोदाः सोम प्रतिरंत आयुः। मंत्र। उबातेना तमंधसो दिविस ८ भूम्याददे उग्रं ८ महिश्रव ८। ४। पंक्ति। १४

ती कात्यायनी प्रीयतां। भगवती माहेश्वरी प्रीयतां। भगवती ऋद्धिकरी प्रीयतां। भगवती वृद्धि
करी प्रीयतां। भगवती पुष्टिकरी प्रीयतां। भगवती तुष्टिकरी प्रीयतां। भगवंतौ विघ्नविनायकौ
प्रीयेतां। सर्वाः कुलदेवताः प्रीयंतां। सर्वा ग्रामदेवताः प्रीयंतां। हताश्च ब्रह्मद्विषः। हताश्च परिपं
थिनः। हताश्च विघ्नकर्तारः। हताश्च विघ्नकराः। शत्रवः पराभवं यांतु। शाम्यंतु घोराणि। शाम्यंतु पा
पानि। शाम्यंत्वीतयः। शुभानि वर्द्धंतां॥ शिवा आपः संतु। शिवा ऋतवः। शिवा ऋतवः संतु। शिवा
अग्नयः संतु। शिवा आहुतयः संतु। शिवा वनस्पतयः संतु। शिवा अतिथयः संतु। अहोरात्राणि शि
वे स्यातां॥ ॥निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यंतां योगक्षेमो नः कल्पतां
॥शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः सर्वे ग्रहाः प्रीयंतां॥
भगवान्नारायणः प्रीयतां। भगवान्पर्जन्यः प्रीयतां। भगवान्स्वामी महासेनः प्रीयतां। प्रसादं वि
धाय। अभिवादयामि सह सर्वैरायुष्मान्भव सपुत्रैः। पुण्याहकालो वाचयिष्ये। वाच्यतां। ब्राह्मपु
ण्यं महर्यच्च सृष्ट्युत्पादनकारकं। वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवंतु नः॥ ब्राह्मणा अस्य यजमा
नस्य गृहे पुण्याहं ब्रुवंतु। ॐ पुण्याहं। २॥ ॥उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंसा

क्षि॥ हृष्वेव वाजी शिग्मतीरपी॥ सः सर्वतो नः शकुने भद्रमावद विश्वतो नः शकुने पुण्यमावद।
॥१॥ पुनंतु मां देवजनाः पुनंतु मनसा धियः। पुनंतु विश्वा भूतानि जातवेदः पुनीहि मा॥२॥ पुण्या
हमस्तु॥ एभिर्द्युभिः सुहृता यांतु यत्कल्याणं पुरातनं। ऋषिभिः सिद्धगंधर्वैस्तत्कल्याणं ब्रुवंतु नः
॥ ब्राह्मणा मम सपरिवारस्य गृहे कल्याणं ब्रुवंतु॥३॥ कल्याणं३॥ अपां सोममस्त्व मिंद्र प्रिया
हि कल्याणी जाया सुरणं गृहे ते। यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावत॥१॥
यथेमां वाचं कल्याणीमावदानि जनेभ्यः ब्रह्मराजन्याभ्यांऽशूद्राय चार्याय च स्वाय चारणा
य च। प्रियो देवानां दक्षिणाये दातुरिह भूयासमयं मे कामः समृध्यतां॥२॥ कल्याणमस्तु॥ ॥
सागरस्य तु या लक्ष्मी महालक्ष्म्यादिभिः स्तुता। संपूर्णा सुप्रभावा च तां च ऋद्धिं ब्रुवंतु नः॥ ब्राह्म
णा मम सपरिवारस्य गृहे ऋद्धिं ब्रुवंतु॥३॥ ऋध्यतां॥३॥ ऋधाम स्तोमः सनुयाम वाजिमा
नो मंत्रा सरथेहोपयातां। यशो न पक्वं मधु गोष्वंतरा भूतांशो अश्विनोः काममप्राः॥ सत्रस्य ऋद्धिरस्य
गन्म ज्योतिरमृता अभूम। दिवं पृथिव्या अध्यारुहामाविदाम देवान्स्वर्ज्योतिः॥२॥ ऋद्धिरस्तु॥ स्वस्तिया
ऽविनाशाख्या पुण्यकल्याणवृद्धिदा। विनायकप्रिया नित्यं तां च स्वस्तिं ब्रुवंतु नः॥ ब्राह्मणा मम सपरिवा ५

रस्य गृहे स्वस्तिं ब्रुवंतु॥३॥ स्वस्ति॥३॥ स्वस्ति ऋषिप्रपदे श्रेष्ठे रेक्णस्वत्यभि या वाममेति सा नो अमा सो अ
रणे निपातु स्वावेशा भवतु देवगोपाः॥१॥ स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति
नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥२॥ स्वस्तिवाचनं समाप्तं॥ ॥ अस्य यागस्य नि
ष्पत्तौ भवंतो प्रार्थिता मया। सुप्रसादं प्रकुर्वंत्वं एतत्कर्मविधानतः॥१॥ आनो भद्रा इत्यनुवाक१०
दीर्घायुत्वा॥११॥ द्यौः शांतिः॥१२॥ इमं मे॥१३॥ वरुणस्योत्तम्॥१४ वरुणः प्राविता॥१६॥ विश्वानि देव७
यदाबध्नं दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः। तन्म आबध्नामि शतशारदायायुष्मान् जर
दष्टिर्यथासन्॥१॥ कांडात्कांडात्प्ररोहंति परुषः परुषः स्पवनस्पति एवा नो दूर्वे प्रतनु सहस्रेण शते
न च॥२॥ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखा करत्प्रण आयूंषि तारि
षत्॥३॥ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुंचंत्वंहसः
॥४॥ वरुणस्योत्तंभनमसि वरुणस्य स्कंभसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुण
स्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद॥५॥ विश्वानि देव सवितुर्दुरितानि परासु
व यद्भद्रं तन्न आसुव॥६॥ ॥ आचमनं॥ ॥ अथ कुशकंडिका॥ ॥ अथातो गृह्यस्थालीपाका
नां कर्म। दर्भैः परिसमुह्य। गोमयेनोपलिप्य स्रुवेणोल्लिख्य। अनामिकांगुष्ठेनोद्धृत्य। उदकेनाभ्यु

त्वा। अग्निमुपसमाधाय। दक्षिणतो ब्रह्मासनं। उत्तरतः प्रणीतासनं। तत्र ब्रह्मोपवेशनं। यावत्कर्म
समाप्यते तावत्त्वं ब्रह्मा भव। ब्रह्मानुज्ञातः। प्रणीताप्रणयनं। स्तर्णं। इशानादि स्वर्ग्निं दर्भैरेकमु-
ष्ट्यापरिस्तरणं। पात्रासादनं। पवित्रच्छेदनानि। त्रीणि पवित्रे द्वे। प्रोक्षणीपात्रं। आज्यस्थाली। च
रुस्थाली। सम्मार्गकुशाः। उपयमनकुशाः। समिधस्तिस्रः। स्रुवः। आज्यं। तंडुलाः। पूर्णपात्रं। सव्य
हस्तकरणं। उद्यगमनं। उत्पवनं। तासामेकैकएनानिरेकप्रोक्षणं। यथासादितपात्राणामे
कैकस्य प्रोक्षणं। आज्यस्थालीप्रोक्षणं। चरुस्थालीप्रोक्षणं। सम्मार्गकुशाः। उपयमनकुशा
ः। समिधः कुशाः। स्रुवः। आज्यं। तंडुलाः। पूर्णपात्रं। उपकल्पनीयानि पात्राणि। असंचरे प्रोक्ष
णीयं सपवित्रहस्त निधाय। आज्यस्थाल्यां आज्यनिर्वापः। चरुस्थाल्यां चरुनिर्वापः। तंडुला
स्त्रिः प्रक्षालनं। दक्षिणत आज्याधिश्रयणं। मध्ये चरोरधिश्रयणं। उल्मुककरणं। च
रोरुन्नयतो पर्यग्निकरणं। अपणं च। प्रणीतोदकमासिच्य॥ ॥अथ ग्रहपीठगमनं। ग्रह
स्थापनं॥ आशुः शिशानः ॥ ॥पीठे चाष्टदलं पद्मं ललाश्रेष्टैः सितास्तैः। सितैरखंडितैः श्रे
ष्ठैः शालितैः श्वेततंडुलैः॥१॥ वृत्तमंडलमादित्ये चतुरस्रं निशाकरे। महीपुत्रे त्रिकोणं स्याद्बु
धे वैबाणसंनिभं॥२॥ गुरवे पहिशाकारं स्तूर्पाकारं तु राहवे। पंचकोणं तु भार्गवे। मंदे तु धनुषा ६

कारं शूर्पाकारं तु राहवे। केतुश्च ध्वजाकारं मंडलानि क्रमेण तु॥ ॥अथ ग्रहवेश्ममानं॥ द्वादशांगु
लं सूर्यस्य सोमस्य द्विगुणं भवेत्। चतुरंगुलं भौमस्य बुधस्य चतुरंगुलं॥२॥ षडंगुलं गुरोश्चैव नवांगुलं
तु भार्गवे। शिवांगुलं शनैश्चैव विंशत्यंगुलराहवे। नवांगुलं तु केतूनां ग्रहपीठं सदा बुधैः। कर्तव्यं शां
तिकेषु ते सर्वसिध्यर्थहेतवे॥३॥ हीने चैव न वे व्याधिः शोकं चैव न याधिके। प्रमाणेन तु वै। श्लिदित्व
स्मात्प्रमाणमालिखेत्॥४॥ सुवर्णभास्करं कुर्यात् राजतेन तु चंद्रमाः। ताम्रमंगारकः कार्यो बुधः कांस्य
मयस्तथा। गैरिकाया गुरुं कुर्यात् त्रिपुणा भार्गवस्तथा। शनिं लोहमयं कुर्यात्वरलोहं तमस्तथा॥६
शीसमयं तया केतुं सर्वं विकथितं मया॥ भास्करांगारकौ रक्तौ श्वेतौ शुक्रनिशाकरौ। सोमपुत्रो गुरु
श्चैव तावुभौ पीतवर्णकौ। कृष्णं शनैश्चरं विंद्याद्राहुकेतू तथैव च॥ आदित्यप्रमुखाः सर्वे व सौरनिःप्र
काशिताः। शुक्राकौ प्राङ्मुखौ ज्ञेयौ गुरुसौम्यावुदङ्मुखौ। प्रत्यङ्मुखो शनिसोमौ शेषा दक्षिणतो मु
खाः॥ ॥मध्ये तु भास्करं विंद्याद्वह्निनेस्वदक्षिणे। दक्षिणे लोहितं विंद्यात् पूर्वेणेव भार्गवं। बुधं पूर्वो
त्तरेण तु। उत्तरेण गुरुं विंद्यात् पूर्वेणेव तु भार्गवं। पश्चिमेन शनिं विंद्याद्राहुं दक्षिणपश्चिमे। पश्चिमो
त्तरतः केतुं स्थाप्या वै शुक्लतंडुलैः॥ ब्राह्मणो भार्गवाचार्यौ क्षत्रियावरलोहितौ। वैश्यो सोमबुधौ
शेषाः शूद्राः प्रकीर्तिताः॥ जन्मस्थगोत्रमग्निश्च वर्णस्थानमुखागतः। ज्ञात्वा कुरुते शांतिग्र
हाले नामसमानितः॥ उदयं तं महद्रूपं तेजस्विनमथापहं। उ निरीक्षं खगमनं सूर्यमावाहयाम्यहं॥

भोभोसूर्यमहाभक्तः कलिंगविषयोद्भवः। रक्तः काश्यपकगोत्रेयः द्विभुजः पद्मलांछनः। सप्ताश्ववाह
नागच्छ पद्ममध्ये वरप्रदः। अग्निरूतेति मंत्रेण रुद्ररूपी प्रतिष्ठितः॥ मध्ये सूर्यः। मंत्रः। अग्निदूतं पुरो
दधे हव्यवाहमुपब्रुवे देवाँ॥ आसादयादिह॥१॥ द्विजानां हि दिदं मेघं मुक्तेशाम त्रिनंदनं। ओषधी
नामधीशं च सोममावाहयाम्यहं॥ आहोचंद्रजगत्त्राण यमुनाविषयोद्भवा। सुश्वेता त्रिगोत्रेयग
दापाणिवरप्रद। दशाश्ववाहनागच्छ उमारूपी समाविश॥ कृताशानदले देवमंत्रेण स्वग्निनार्चि
तः॥ आग्नेये चंद्रः। मंत्रः। अप्स्वग्ने सधिष्टव सौषधिरनुरुध्यसे गर्भे संजायसे पुनः॥२॥ तेजसा इः सहंकृ
रं स्वेदोद्भूतं पिनाकिनः। शत्रूणां नाशकर्तारं भौममावाहयाम्यहं॥ उक्रयित्क्षांसमुत्पन्नो भो भो
भौम चतुर्भुजः। नरराजकुलेजातः शूलशक्तिगदाधरः। वरदो मेषमारूढः स्कंधशायतडित्भूनो।
सोनाशधिविमंत्रेणं दलेयाम्यप्रतिष्ठितः॥ दक्षिणे भौमः। मंत्रः। स्योना पृथिवि नो भवानृक्षरा निवि
शनियच्छा नः शर्म सप्रथा॥३॥ अनवुद्धिप्रदातारं सौम्यरूपं यशःप्रदं। यजमानहितार्थाय बुधमा
वाहयाम्यहं॥ आहो चंद्रसुत श्रीमागधायां समुद्भवः। अत्रिगोत्र चतुर्बाहो खड्गखेटकधारक। गदावरा
सिहस्तसुवर्ण मध्ये समाविश। ऊत्सवदीशपत्रे च रुद्र दं विष्णुप्रपूजितः॥ ईशाने बुधः॥ मंत्रः॥ इदं विष्णुर्विक्र
मे त्रेधा निदधे पदं समूढमस्य पांसुरे स्वाहा॥ रक्षितारं सुराणां हि दानवानां नयप्रदं। प्रजितं पुरुकु ७
तस्य गुरुमावाहयाम्यहं॥ आहो वाचस्पते पीतः संजातः सिंधुमंडले। एसांगिरसगोत्रेय हयारूढ

चतुर्भुजः। दंडाक्षसूत्रवरदः कमंडलुधरः प्रभो। महांद्रेति मंत्रेणं ज्योविधिवदुत्तरे दले॥ उत्तरे गु
रुः॥ मंत्रः॥ महां इंद्रो वज्रहस्तः षोडशी शर्म यच्छतु। हंतु पाप्मानं योस्मान् द्वेष्टि॥ शुक्रं विद्याविशेष
तं महता तेजसोज्ज्वलं। ज्ञातारं सर्वदैत्यानां भृगुमावाहयाम्यहं॥ भो भो भोजकटे जात शुक्र श्वे
ताश्ववाहनः। समागच्छ चतुर्बाहो भृगुगोत्रविभूषणः। परिवारक्षावलिहस्त कमंडलुधर प्रभो॥
पूर्वपत्रेति शुक्रस्य शुक्रज्योतिः प्रपूजयेत्॥ पूर्वे भार्गवः॥ मंत्रः॥ शुक्रज्योतिश्च शुक्रं चित्रज्योति
श्च सत्यज्योतिश्च ज्योतिष्मांश्च शुक्रश्च ऋतपाश्चात्यंहा॥६॥ कृष्णवर्णं महाक्रूरं कृष्णाजिनधरं त
था। मंदकं सूर्यपुत्रं तं शनिमावाहयाम्यहं॥ आहो सौराष्ट्रसंजात छायापुत्र चतुर्भुजः। कृष्णाव
र्णार्कगोत्रेय वाणहस्त धनुर्धरः। त्रिशूली च समागच्छ वरदो गृध्रवाहनः। प्रजापत्येति संस्थाप्य
मदेवापरे दले। पश्चिमे शनिः॥ मंत्रः। प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव॥ य
त्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां॥ कृष्णवर्णं कोकिलाभं कृष्णाजिनधरं तथा
। सिंहिकागर्भसंभूतं राहुमावाहयाम्यहं॥ राहो वर्वर देशोत्थ संजातः कायवर्जितः। पत्रे पैठीन
से स्वाहि सिंहारूढो वरप्रदः। करालवदनं श्रेष्ठा कालरूपा जनप्रभो। आयंगौरिति मंत्रेण सज्यो
नैरृत पत्रके। नैरृते राहुः। मंत्रः। आयंगौः पृश्निरक्रमीदसदन्मातरं पुरः। कृरान्तखगमि

नोत्स्मान्स्तु नाश्च न फलप्रदान्॥ एकाधिकसहस्रं तु केतुमावाहयाम्यहं॥ केतवो विविधाकारा
मलयाचैमसुद्भवाः॥ द्विभुजाजैमुनेगोत्रे यंगदाहस्तवरप्रदाः॥ आगच्छंतु कोपानस्याशोननेमारु
नेदले॥ ब्रह्मयत्तानेनेति मंत्रेण चित्रगुप्तमभिवार्चितः॥ वायव्ये केतवः॥ मंत्रः॥ ब्रह्मयत्तानं प्रथमं
पुरस्ताद्विसीमतः सुरुचो वेन आवः। स बुध्न्या उपमा अस्य विष्ठाः सतस्य योनिमसतस्य विवः॥९
नवग्रहाः समाप्ताः॥ ॥देवता लिख्यते॥ एवं ग्रहान् प्रतिष्ठाप्य स्थापनीयाश्च देवताः॥ तेषां स्था
नानि मंत्रांश्च प्रवदाम्यहं॥ रुद्रश्च पार्वती चैव स्कंदो विष्णुस्तथैव च। ब्रह्मेंद्र यमकालश्च चित्रगु
प्तस्सदैव हि॥ रुद्रं त्र्यंबक मंत्रेण रविरुत्तरतो न्यसेत्। सूर्यमंडले उत्तरे। मंत्रः॥ त्र्यंबकं रुद्रस्याप्य
॥त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं। उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात्॥ सोम
श्चाग्निदिग्भागे श्रीश्च ते मे न कान्यजां॥ सोममंडले आग्नेये। मंत्रः॥ श्रीश्च ते लक्ष्मीश्च पत्न्यावहो
रात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तं। इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण॥ यद
क्रंदेति सोमस्य स्कंदं याम्ये प्रपूजितः। सोममंडले दक्षिणे॥ मंत्रः॥ यदक्रंदः प्रथमं जायमानः उ
द्यन्समुद्रादुत वा पुरीषात्। श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन्॥३॥ विष्णुर्वि ९
ष्णोरराटे च यजत्सर्वे बुधस्य च। बुधमंडले सर्वे विष्णुः। मंत्रः॥ विष्णोरराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः

स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा॥४॥ गुरोरुत्तरतो न्यस्यो ब्रह्मा ब्रह्मेति मंत्रतः। गुरुमंड
ले उत्तरे॥ मंत्रः॥ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इषव्योतिव्याधी महार
थो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरंधिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमान
स्य वीरो जायतां॥ निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यतां योगक्षेमो नः
कल्पतां॥५॥ सजोषा इंद्रेति शुक्रस्य प्राच्यां शुक्रं निधापयेत्। शुक्रमंडले सर्वे इंद्र मंत्रः॥ सजोषा इं
द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान्। जहि शत्रूँरप मृधो नुदस्वाथाभयं कृणुहि वि
श्वतो नः॥६॥ शनैः पश्चिमतः स्थाप्य यमाय त्वेति मंत्रतः। शनिमंडले पश्चिमे यम मंत्रः॥ यमाय
त्वा मखाय त्वा सूर्यस्य त्वा तपसे देवस्त्वा सविता मध्वानक्तु पृथिव्याः संस्पृशस्पाहि। अर्चिरसि शो
चिरसि तपोसि॥७॥ कार्षिरसीमेति मंत्रेण राहोः कालं तथोत्तरे। राहुमंडले उत्तरे काल मंत्रः॥ का
र्षिरसि समुद्रस्य त्वाक्षित्या उन्नयामि। समापो अद्भिरग्मत समोषधीभिरोषधीः॥ चित्रगुप्तं तु केतू
नां चित्रावसो इति नैर्ऋते। चित्रावसोस्वस्ति ते पारमशीय॥८॥ इति देवताः समाप्ताः॥ ॥अथाधिदे
वता लिख्यते॥ ॥वह्निः सूर्यस्य आग्नेय्यां स नः पितेति मंत्रतः। स नः पितेव सूनवेग्ने सूपायनो भ
व सचस्वा नः स्वस्तये॥१॥ आपः सोमस्य नैर्ऋते। आप मंत्रः॥ आपो अद्यान्वचारिषं रसेन समगस्म
हि। पयस्वानग्न आगमं तं मा संसृज वर्चसा प्रजया च धनेन च॥ विदसि सोम वायव्ये। विदसि

नयादेवसृजेनवर्चसातयांगिरस्वध्रुवासीद।परिचिदसितयादेवतयांगिरस्वध्रुवासीद॥३॥बु
धमंडलेउत्तरेमंत्रः।इदंविस्नुर्विचक्रमेत्रेधानिदधेपदंसमूढमस्यपांसुरेस्वाहा॥४॥गुरुमं
डलेउत्तरेइंद्रमंत्रः।इंद्रआसांनेताबृहस्पतिर्दक्षिणायज्ञःपुरएतुसोमः।देवसेनानामभि
भंजतीनांजयंतीनांमरुतोयंत्वग्रम्॥५॥शुक्रमंडलेपश्चिमेइंद्राणीमंत्रः।इंद्रंदैविविशो
मरुतोनुवर्त्मानोभवंत्यथेंद्रंदैविविशोमरुतोनुवर्त्मानोभवत्।एवमिमंयजमानंदैवीश्च
विशोमनुषिश्चानुवर्त्मानोभवंतु॥६॥शनिमंडलेपश्चिमेमंत्रः।प्रजापतेनत्वदेतान्यन्योवि
श्वाजघाणिपरितावभूव।यत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्यामपतयोरयीणाम्॥७॥
राहुमंडलेपश्चिमेमंत्रः।नमोस्तुसर्पेभ्योयेकेचपृथिवीमनु।येअंतरिक्षेयेदिवितेभ्यःसर्पेभ्योन
मः।केतुमंडलेईशानेवायुमंत्रः।ब्रह्मयज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवःस
बुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः॥ ॥अधिदेवतासमाप्ताः॥ ॥नवनागा
लिख्यते॥ ॥सूर्यमंडलेसर्वेअनंतनागमंत्रः॥आनोभद्राःक्रतवोयंतुविश्वतोदब्धासोअपरी
तासउद्भिदः।देवानोयथासदमिद्वृधेअसन्नप्रायुवोरक्षितारोदिवेदिवे॥१॥चंद्रमंडलेप
श्चिमेनागवासुकिमंत्रः॥देवानांभद्रासुमतिरृजूयतांदेवानांरातिरभिनोनिवर्त्ततांदे ९
वानांसख्यमुपसेदिमावयंदेवानआयुःप्रतिरंतुजीवसे॥२॥भौममंडलेपश्चिमेनाग---

मंत्रः।तान्पूर्वयानिविदाहूमहेवयंभगंमित्रमदितिंदक्षमस्त्रिधं।अर्यमणंवरुणंसोममश्वि
नःसरस्वतीनःसुभगामयस्करत्॥बुधमंडलेउत्तरेनागकर्कोटकमंत्रः।तंनोवातोमयोभुवातुभे
षजंतन्मातापृथिवीतत्पितायौः।तद्ग्रावाणःसोमसुतोमयोभुवस्तदश्विनाशृणुतंधिष्ण्यायुव
म्॥४॥गुरुमंडलेउत्तरेनागपद्ममंत्रः।तमीशानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयं
पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धःस्वस्तये॥शुक्रमंडलेसर्वेनागमहापद्ममंत्रः॥स्व
स्तिनइंद्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः।स्वस्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्द
धातु॥६॥शनिमंडलेपश्चिमेनागशंखमंत्रः॥पृषदश्वामरुतःपृश्निमातरःशुभंयावानोविदथे
षुजग्मयः।अग्निजिह्वामनवःसूरचक्षसोविश्वेनोदेवाअवसागमन्निह॥७॥राहुमंडलेदक्षिणे
नागकंबलमंत्रः।भद्रंकर्णेभिःशृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः।स्थिरैरंगैस्तुष्टुवांसस्त
नूभिर्व्यशेमहिदेवहितंयदायुः॥८॥केतुमंडलेनागगुलिकमंत्रः।शतमिन्नुशरदोअंतिदेवाय
त्रानश्चक्राजरसंतनूनाम्।पुत्रासोयत्रपितरोभवंतिमानोमध्यारीरिषतायुर्गंतोः॥९॥
अदितिर्द्यौरदितिरंतरिक्षमदितिर्मातासपितासपुत्रः।विश्वेदेवाअदितिःपंचजनाअदिति
र्जातमदितिर्जनित्वम्॥१०॥दीर्घायुत्वायबलायवर्चसेसुप्रजास्त्वायसहसाअथोजीवशारदः।

शनम्॥१५॥द्यौःशांतिरंतरिक्षंशांतिःपृथिवीशांतिरापःशांतिरोषधयःशांतिर्वनस्पतयःशांति
र्विश्वेदेवाःशांतिर्ब्रह्मशांतिःसर्वंशांतिःशांतिरेवशांतिःसामाशांतिरेधि॥१२॥विश्वानिदेवसवि
तर्दुरितानिपरासुवयद्भद्रंतन्नआसुव॥नवनागाःसमाप्ताः॥ ॥पंचलोकपालालिख्यंते॥ ॥सूर्य
मंडलेवायव्येगणेशमंत्रः॥गणानांत्वागणपतिंहवामहेप्रियाणांत्वाप्रियपतिंहवामहेनि
धीनांत्वानिधिपतिंहवामहेवसोमम॥आहमजानिगर्भधमात्वमजासिगर्भधम्॥१॥शनिमं
डलेईशाने२।केतुमंडलेआग्नेये॥३॥गुरुनैऋते४।तंनमपरंनराले।पंचलोकपालाःसमाप्ताः॥ ॥
चतुःपथेमध्येविनायकमंत्रः।गणानांत्वा॥१॥दुर्गाउत्तरेमंत्रजातवेदसे।२जातवेदसेसुनवामसो
ममरातीयतोनिदहातिवेदः।सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः॥२॥वा
युदक्षिणेमंत्रः।वायोयेतेसहस्रिणोरथासस्तेभिरागहि।नियुत्वान्सोमपीतये॥आकाशपश्चिमेमं
त्रः।व्रतंव्रतपावानःपिबतस्वसोमंस्वसोपावानःपिबतांतरिक्षस्यहरिरसिस्वाहा॥दिशःप्रदिशआ
दिशोविदिशउद्दिशोदिग्भ्यःस्वाहा॥५॥अश्विनीकुमारौपूर्वे।मंत्रः।यावांकशामधुमत्यश्विनासू
नृतावती।तयायज्ञंमिमिक्षतं॥इतिपंचलोकपालमंत्राः॥ ॥अष्टाविंशतिनक्षत्राणिलिख्यंते॥ ॥
अश्विनीतेजसाश्विभ्यां।भरणीप्रयमाचान्नंकृत्तिकाचायमग्निश्चब्रह्मयज्ञेतिरोहिणी।सोमोधेन्वेति १०

सौम्यंचनमस्तेरुद्ररुद्रं।अदितिर्द्यौःपुनर्वसौपुष्यंबाचस्पतेतनु।सार्प्यंसर्पदैवत्यं।पितृदैवतं।पितृभ्यः
नगप्रणेतिपूर्वाफाल्गुनी।देव्यावध्वर्युउत्तराफाल्गुनीतथा॥हस्तंविभ्राटमंत्रेणत्वाष्ट्रं।त्वष्टे
तिस्वनुयेत्।पीवोअन्नेतिवायव्ये।इन्द्राग्नीमिद्रदेवतं।नमोमित्रेतिमैत्रं।तुसद्मुहस्तैःपुरंदरास्
लम्यंतेचमूलंचपूर्वाषाढामपाघमा॥विश्वेआघेतिविश्वेशंगायत्र्याभिजितंस्मृतं।श्रवण
विष्णुमंत्रेणधनिष्ठावसुधाराया।पंचवारुणवारुण्यांअजपादोनमोस्तिते।शिवोनामेत्यहिर्बुध्नं
पौष्णंपूषन्तवेनतु॥ ॥ईशानकोणादारभ्याग्निपर्यंतानिसप्तनक्षत्राणि।स्वात्यादीनिपुनर्वसु
॥अश्विनातेजसाचक्षुःप्राणेनसरस्वतीवीर्यंवाचेंद्रोबलेनेन्द्रायदधुरिंद्रियं।१।यमायत्वामखा
यत्वासूर्यस्यत्वातपसेदेवस्त्वासवितामध्वानक्तुपृथिव्याःसंस्पृशस्पाहि।अर्चिरसिशोचिरसितपोसि
॥२॥अयमग्निःसहस्रिणोवाजस्यशतिनस्पतिः।मूर्धाकविरयीणाम्॥३॥ब्रह्मयज्ञानंप्रथमंपु
रस्ताद्विसीमतःसुरुचोवेनआवः।सबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः॥४॥
सोमोधेनुंसोमोअर्वंतमाशुंसोमोवीरंकर्मण्यंददाति।सादन्यंविदथ्यंसभेयंपितृश्रवणं
योददाशदस्मै॥५॥नमस्तेरुद्रमन्यवउतोतइषवेनमः।बाहुभ्यामुततेनमः॥६॥अदितिर्द्यौ
रदितिरंतरिक्षमदितिर्मातासपितासपुत्रः।विश्वेदेवाअदितिःपंचजनाअदितिर्जातमदि
तिर्जनित्वम्॥७॥अग्निकोणादारभ्यनैऋतकोणांतानिसप्तनक्षत्राणि।मघादीनिताहुपर्यंता

निमनक्षत्राणि॥ स्थाप्य॥ वाचस्पते पवस्व विस्नो अंशुभ्यां गभस्तिपूतः। देवो देवेभ्यः पवस्व येषां भा
गोसि॥८॥ नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु। ये अंतरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः॥९॥ पितृभ्यः स्व
धायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नम
॥ अक्षन्पितरोमीमदंत पितरोतीतृपंत पितरः पितरः शुंधध्वम्॥१०॥ नगप्रणेतिर्नगस्त्वराधो
नगपाधियमुद्वाददंनः। नगप्रनोजनयेगोभिरश्वैर्नगप्रनृभिः नृवंतः स्याम॥१२॥ विभ्राट्
बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतं। वातजूतो यो अभिरक्षति त्मना प्रजाः पुपो
ष पुरुधा विराजति॥१३॥ त्वष्टा तुरीपो अद्भुत इंद्राग्नी पुष्टिवर्धना। द्विपदा छंद इंद्रियमुक्षा गौर्न
वयो दधुः॥१४॥ नैरृतकोणादारभ्य वायव्यपर्यंतानि समनक्षत्राणि। स्वात्यादीनि। उत्तराषा
ढपर्यंतानि स्थाप्य॥ पितृपितरो नो यिहवः सुहवः सुमेधाः स्वेतः। विषक्ति नियुता मन्निस्त्रीः। नेवाय
व्येममनसो वितस्तु विश्वे नारः स्वपत्या चक्रुः॥१५॥ इंद्राग्नी आगतं सुतं गीर्भिर्नभो वरेण्यम्
अस्य पातं धियेषिता॥१६॥ नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत। दूरेदृशे
देवजाताय केतवे दिवस्पुत्राय सूर्याय शंसत॥१७॥ स इषुहस्तैः स निषंगिभिः वशी संस्र
ष्टा स युध इंद्रो गणेन। संसृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता॥१८॥ मातेव
पुत्रं पृथिवी पुरीष्यमग्निं स्वे योनावभारुखा। तां विश्वैर्देवैरृतुभिः संविदानः प्रजापतिर्विश्वकर्मा ११

विमुंचतु॥१९॥ अपघ्नमापकिल्बिषमपकृत्यामपारपः। अपामार्गत्वमस्मदपदुःस्वप्न्यं सुव॥२०॥ विश्वे
अद्यामरुतो विश्वऊती विश्वे भवंत्वग्नयः समिद्धाः। विश्वे नो देवा अवसागमंतु विश्वमस्तु द्रविणं
वाजो अस्मे॥२१॥ वायव्यकोणादारभ्य ईशानकोणांतानि समनक्षत्राणि। अभिजिदारभ्य पौष्ण
पर्यंतानि स्थाप्य॥ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्॥२२॥ इदं विष्णुर्वि
चक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे स्वाहा॥२३॥ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि स
सहस्रधारम्। देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः॥२४॥ वरुणस्योत्तं
ननमसि वरुणस्य स्कंभसर्जनी स्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य
वरुणस्य ऋतसदनमासीद॥२५॥ उत नो अहिर्बुध्न्यः शृणोत्वज एकपात्पृथिवी समुद्रः। विश्वे देवा ऋता
वृधो हुवानाः स्तुता मंत्राः कविशस्ता अवंतु॥२६॥ शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा हिं
सीः। निवर्तयाम्यायुषेन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय॥२७॥ सप्तवहतनधय
अरिष्येम कदाचन स्तोतारस्तु हृहस्मसि॥२८॥ इत्यष्टाविंशतिनक्षत्राणि समामानि च॥ अथयो
गाः। ईशानकोणे बुधमंडले एकस्मिन्योगमंत्रः। योगेयोगेतियोगस्य ईशान्यां पत्रबासते। योगेत
वस्तारं वाजे वाजे हवामहे॥ सखाय इंद्रमूतये॥ अग्निकोणे चंद्रमंडले एकस्मिन्करणमंत्रः। भद्रं
करणे॥१॥ भद्रं कर्णेभिस्त्वा ये यांश्च कर्णानां प्रजयेत्॥२॥ अपध्रुवादयः स्थाप्याः। सूर्यमंडले उत्तरे

केतुं स्थाप्य॥ केतवोसीति केतवं मध्ये ग्रहाणां च सतारकाः।आदित्यमंडले चैव वामदेवाधिदेवयोः॥
केतोसि केतवो यं यन्नमानो स्मिन्नायतने प्रजया पशुभिर्भूयात्। पृथिवी सूर्येयामिंद्रस
हृदिरसि विश्वजनस्य छाया॥२॥ गंगाद्याः सरितः सर्वाः पंचनद्येति सृजयेत्। सूर्यान्पश्चिमभागे
४ तिष्ट चपत्रवाहे प्रसृजयेत्। पंचनद्यैति मंत्रेण पंचनदीः स्थाप्य॥ शनिमंडले सर्वैः पंचनद्यः सरस्वतीम
पीयंति सस्रोतसः सरस्वती तु पंचधा सोदेशे भवत्सरितः॥२॥ सप्तऋषीति मंत्रेण स्थापयेद्गुरु सूर्य
योः। अंतरे गुरुमार्तंडयोर्मध्ये। अंतराले रेखाउपरि। सप्तऋषयमंत्रेण॥ सप्तर्षीन्स्थाप्य॥ ॐ सप्तऋ
षयः प्रतिहिताः शरीरे सप्तरक्षंति सदमुप्रमादम्। सप्तापः स्वपतो लोकमीयुः तत्र जागृतो अस्वप्न
जौ सत्रसदौ च देवौ॥३॥ सागरान्सप्त इमं मेति सरितोधः स्थापयेत्ततः। इमं मेति मंत्रेण सप्तसागरा
न्पश्चिमे शनिमंडले। सर्वे सरितोऽधः। ॐ इमं मे वरुणस्य धीह वमद्या च मृडयतामवस्युराचके॥
४॥ सपर्वतेति मंत्रेण उत्तरस्यां दिशि च पर्वतान्। उत्तरस्यां दिशि। पदवाहे। नक्षत्रमांगतये। एक
स्मै स्वः पर्वतेति मंत्रेण सपर्वतान्स्थाप्य। सपर्वतस्य ककुभवस्य एष्ठां नाव स्थिरं तिस्वशिचरयानाः ता
वहत्वंनधरागुदिक का अहिर्बुध्न्यमतुरीयमाणाः॥५॥ यवोयस्तेति मंत्रेण स्कंदं स्थापयेत्सूर्यतोऽ
धः। सूर्यमंडले पश्चिमे। एवं तद्देवतानु। यवोयस्ते वाजिन्निहितो गुहा यः श्येने परीतो अचरच्च वाते। तेन
नो वाजिन्बलवान्बलेन वाजिजिच्च भव सम्ने च पारयिष्णुः॥६॥ सुपर्णोसीति मंत्रेण गरुत्मानं स्थाप्य॥ १२
मंडले ईशाने। बुधमंडले गरुडं स्थाप्य। सुपर्णोसि गरुत्मान्स्त्रिवृत्ते शिरो गायत्रं चक्षुर्बृहद्रथंतरे प
क्षौ स्तोम आत्मा छंदांसि अंगानि यजूंषि नाम। साम ते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः श
फाः सुपर्णोसि गरुत्मान्दिवं गच्छ स्वः पत॥७॥ ॥अथ रुद्रकलशस्थापनमंत्रः॥ ॥ नरसिंहमिर
स्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धत्री यं पृथिवी यं यच्छ पृथिवीं दृंह पृथिवीं मा हिंसीः
॥ आजिघ्र कलशं मह्या त्वा विशंत्विंदवः। पुनरूर्जा निवर्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती
पुनर्मा विशताद्रयिः॥९॥ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां पिपृतां नो भरीमभिः॥१०॥
हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्स दाधार पृथिवीं द्यामुतेमां कस्मै देवा
य हविषा विधेम॥११॥ वरुणस्योत्तंभनमसि वरुणस्य स्कंभसर्जनी स्थो वरुणस्य ऋतसद
न्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद॥१२॥ अश्वत्थे वो निषदनं प
र्णे वो वसतिष्कृता। गोभाज इत्किलासथ यत्सनवथ पूरुषं॥१३॥ या ओषधीः पूर्वा जाता देवेभ्य
स्त्रियुगं पुरा। मनै नु बभ्रूणामहं शतं धामानि सप्त च॥१४॥ सुजातो ज्योतिषा सह शर्म वरूथमा
सदत्स्वः। वासो अग्ने विश्वरूपं संव्ययस्व विभावसो॥१५॥ सर्पादर्धि परापत सर्वा पुनरापत वस्ने
वहि क्रिणा वहा इष मूर्जं शतक्रतो॥१६॥ धान्यमसि धिनुहि देवान्प्राणाय त्वोदानाय त्वा व्यानाय

त्वादीर्घामनुप्रसितिमायुषेधांदेवोवःसवितोहिरण्यपाणिःप्रतिगृह्णात्वछिद्रेणपाणिनाचक्षुषे
त्वामहीनांपयोसि॥१७॥याःफलिनीयाअफलाअपुष्पायाश्चपुष्पिणीः।बृहस्पतिप्रसूतास्तानो
मुंचंत्वंहसः॥१८॥असंख्यातेतिमंत्रेणरुद्रोरुद्रवद्धरांनपि।असंख्यातासहस्राणियेरुद्राअधिभूम्यां स्था॰
।तेषांसहस्रयोजनेवधन्वानितन्मसि॥१९॥सरूपसूक्तेनषोडशर्चैर्विष्णुंस्थापय।सहस्रशीर्षमं
त्रैः।शनिमंडलेपश्चिमे।२०प्रजापतेतिमंत्रेणब्रह्माणंस्थापयेत्ततः।राहुमंडले।नैरृतकोणे।वा
स्तोष्पतेतिमंत्रेणवास्तुंस्थापय।प्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिताबभूव॥२१॥अमीवा
हावास्तोकमंत्रेणवास्तुंश्चराहुमंडले॥ ॥अमीवाहावास्तोष्पतेप्रतिजानीह्यस्मान्स्वावेशोअनमी
वाभवन्यत्तेमहीप्रतितन्नोजुषस्वशंनोभवंतुद्विपदेशंचतुष्पदे॥२२॥गणानांत्वेतिमंत्रेणग
णेशंकेतुमंडले।स्थापय।नमोस्तुसर्पेभ्योऽग्निमंडकोणे।चंद्रमंडलेक्षेत्रपालंस्थापय।नमोस्तुसर्पेभ्योयेकेच
पृथिवीयेंतरिक्षेयेदिवितेभ्यःसर्पेभ्योनमः॥२४॥ईशानकोणेबुधमंडलेचामुंडां।जातवेदसेस्थापय।
मंत्रस्तूक्तः।योवःशिवेतिमंत्रेणदक्षिणदिशिसोममंडलेउत्तरे।चतुर्दिक्षुमातृकांस्थापय।योवःशिवत
मोरसस्तस्यभाजयतेहनःउशतीरिवमातरः॥२५॥ऋग्वाद्याःसमाप्ताः॥ ॥वेदालिख्यंते॥ऋग्वेदंन्यसेत्
प्राच्यांअग्निमीळेतिमंत्रतः।अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजंहोतारंरत्नधातमम्॥१॥इषेत्वेतियजु
२३

यजु॰सो॰ध्रुवा॰स्मिन्गोपतौ२
वेददक्षिणस्यांतुविन्यसेत्॥उइषेत्वोर्जेत्वावायवस्थदेवोवःसवितापार्पयतुश्रेष्ठतमायकर्मणआ
प्यायध्वमघ्न्याइंद्रायभागंप्रजावतीरनमीवाअयक्ष्मामावस्तेनईशतमाघशंसोस्मातबह्वीर्य
जमानस्यपशून्पाहि॥१॥अग्निआयाहिमंत्रेणसामवेदंपश्चिमे।अग्नआयाहि।वीतयेतयेरहा।
नोहव्यदातयेनिहोतासत्सिबर्हिषि॥२॥अथर्वेणमुत्तरेस्थापयमंत्रः॥शन्नोदेवीरभिष्टयआपोभवं
तुपीतयेशंयोरभिस्रवंतुनः॥४॥चतुर्वेदाःसमाप्ताः॥ ॥दिक्पालालिख्यंते॥अहोइंद्रगजेंद्रस्थव
ज्रहस्तःप्रसजितः।त्रातारमिंद्ररूपेणप्रविरक्षदिवेस्मते॥त्रातारमिंद्रमवितारमिंद्रं॰हवेहवेसुहव
॰शूरमिंद्रम्।ह्वयामिशक्रंपुरुहूतमिंद्रं॰स्वस्तिनोमघवाधात्विंद्रः॥१॥अहोवह्निस्समाविरशक्ति
हस्तमहाबलः।त्वन्नोअग्नेतिमंत्रेणरक्षाग्नेयीदिशामते॥२॥त्वन्नोअग्नेतवदेवपायुभिर्मघोनोर
क्षतन्वश्चवंद्य।त्रातातोकस्यतनयेगवामस्यनिमेषं॰रक्षमाणस्तवव्रते॥३॥अहोमहिषमारूढ
दंडपाणेवरप्रदः।सज्योसुगत्नपथेतियमोरक्षतुदक्षिणे।सुगन्नुपथाप्रदिशन्नएहिज्योतिषध्येस्य
जरन्नआयुः।अपैतुपरमनस्मआगावैवस्वतोअभयंकृणोतुनः॥४॥अहोनैरृतदिक्पालनैरृत्यांखड्ग
धारक।आगच्छकोणिकारूढोअसुंनैरृतेतिसज्जितः।असुन्वंतमयजमानमिच्छस्तेनस्येत्यामन्वि
हितस्करस्य।अन्यमस्मदिच्छसातइत्यानमोदेविनिरृतितुभ्यमस्तु॥५॥अहोवरुणदिक्पालवारु
णांमकरस्थितः।अर्चितःपाणिहस्तश्चतत्वायामीतिमंत्रतः॥६॥तत्वायामिब्रह्मणावंदमानस्त
दाशास्तेयजमानोहविर्भिः।अहेडमानोवरुणहबोध्युरुशंसमानआयुःप्रमोषीः॥७॥अहोपवन

दिक्पालस्तगणस्तुष्टिसमाश्रितः। आनोनियुद्भिर्मंत्रेण वायव्यां रक्ष सर्वदा॥ आनोनियुद्भिः शतिनीभिर
ध्वरं सहस्रिणीभिरुपयाहियज्ञं। वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः॥७॥
अहोनरविमानस्थ गदापाणे वरप्रदः। रक्ष कौबेरकौं दिशां वयं सोमेति मंत्रतः॥ वयं सोम
व्रते तव मनस्तनुषु बिभ्रतः। प्रजावंतः सचेमहि॥८॥ अहो वृषसमारूढ शूलपाणे वरप्रदः। रुद्र
संप्रज्ञि नः साक्षात्तमीशानेति मंत्रतः। तमीशानं०॥९॥ अहो हंससमारूढ व्योम रक्ष सर्वदा
।कमंडलुधरस्याशोरस्मेरुद्रायसांजिताः॥ अस्मेरुद्राय मेहना पर्वतासो मेहत्रहात्मनरहुतो।
सजोषाः। यः शंसते स्तुवते धायि पज्र इंद्रज्येष्ठा अस्मां२॥ अवंतु देवाः॥९॥ अहो गरुडमारू
ढः शंखचक्रगदाधरः। स्योनापृथिवीमंत्रेण पयस्वमध्ये दिशि स्योनापृथिवी॥१०॥ इति दिक्पा
लाः समाप्ताः॥ ॥प्रतिष्ठामंत्रः॥ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ
ँ समिमं दधातु विश्वेदेवास इह मादयंतामों३॥ एषवै॥ सर्वोपचरित एवं गुणविशिष्टायां पुण्य
तिथौ आदित्यादिनवग्रहस्थापितदेवताः सकलवर्णाः मंडपाधिष्ठातृदेवतासहिताः सुप्रतिष्ठाः शां
तिदाः पुष्टिदा वरदाः संतु॥ लघुस्नपनं। श्रीखंडं भार्गवे चंद्रे भौमे केसरकं चंदनं। बुधे जीवे च तमसं शे
षाणां कुंकुमं स्मृतं॥१॥ कुंकुमागरुकस्तूरीकर्पूरं चंदनं तथा। पंचयोगाः समंति। तं बुधे जीवे सदा
प्रियं॥ हयारिकुसुमैः सूर्यं कुमुदैश्चंद्रमर्चयेत्। खितिनं तु जपापुष्पैश्चंपकैः सोमनंदनं॥२॥ शतपत्रै १४
र्गुरुः सम्योजातिपुष्पैश्च भार्गवः। मल्लिकाकुसुमैः पंगुः कुंदपुष्पैर्विधुंतुदः॥३॥ केतूनानाविधैः पुष्पैर्ब

तुकालोद्भवैः पुष्पैः। कुंदराज्यं रवेर्धूपं सल्डकाज्यं निशाकरे। दारुकं च महीपुत्रे बुधे जीवे गरुः स्मृतः। साज्यं
लिंबुगिरं शुक्रे चानोदद्याश्च गुग्गुलं। राहोर्व्याख्यानखं केतुमंत्रेण धूपमीति च। गुडान्नं क्षीरकंसारं दुग्धा
न्नं दधिगुडकं। घृतान्नं कृशरामाख्या विचित्रान्नं पृथक् पृथक्॥ द्राक्षेक्षु सगनारिंगं जंबीरं बीजपूरकं।
उत्तरी नालिकेरं स्यात् दाडिमं च यथाक्रमं॥ अलाभे यानि भोज्यानि फलस्थानि दापयेत्। खेचराणां च
नां फलं पुष्पाणि विविधानि च॥ नववर्त्रिपुनं दीपं दृष्टेनेन परिस्फुरितं। ग्रहाणामग्रतः स्थाप्य नैवेद्यं सुमं
त्रकल्पितं॥ इदमत्रचंदनं च पुष्पधूपदीपस्थापितदेवतानां लघुस्नपनविधेः परिसमाप्तमस्तु। स्रुचे
चरोः स्रुवप्रवपनं। सन्मार्गकुशैः स्रुवसंमार्जनं। अग्रेऽग्रं मूले मूलं। प्रणीतोदकेनाभ्युक्षणं। पुनः प्र
तपवनं। देशे निधानं। आज्योद्वासनं। चरोद्वासनं। स्रुतानां तु पूर्वेण उदक्स्रुतानां तु पृष्ठतः। आज्याति
पवनं। आज्यावेक्षणं। उपद्रवनिरसनं। पवित्रेणाज्योत्पवनं। प्रक्षिण्याः प्रस्तुवचनं। उपयमनकुशो
दानं। समिदाधानं। तिस्रः समिधः प्रक्षेपः। समिदाधायस्वाहा। प्रोक्षणीशेषोदकेन सपवित्रं हस्तेन
पर्युक्षणं। प्रणीतयोः प्रणीतागमनं। दक्षिणजानुनोमो निपातः। ब्रह्मान्वारंभे स्रुवेण होमः। उं प्रजा
पनयेस्वाहा। इदं प्रजापतये। इंद्राय स्वाहा। इदमिंद्राय। अग्नये स्वाहा। इदमग्नये। सोमाय स्वाहा
इदं सोमाय। वरुणा[illegible]मनं स्वाहा। इदं वरुणाय। वरदनाम्ने वैश्वानराय इदमत्रचंदनं च पुष्पं
॥ ॥दिक्पालस्नानं। इंद्रायनमः। इंद्रानुचरेभ्योनमः। अग्नयेनमः। अग्न्यनुचरेभ्योनमः। यमायनमः
यमानुचरेभ्योनमः। नैऋतयेनमः। नैऋत्यनुचरेभ्योनमः। वरुणायनमः। वरुणानुचरेभ्योनमः। वाय

वेनमः। वाय्वनुचरेभ्यो नमः। कुवेराय नमः। कुवेरानुचरेभ्यो नमः। ईशानाय नमः। ईशानानुचरेभ्यो नमः। आ
काशाय नमः। आकाशानुचरेभ्यो नमः। पृथिव्यै नमः। पृथिव्यनुचरेभ्यो नमः। दत्तो बलिर्यो यस्य विभागः स
ह प्रतिगृह्यतां। उदकेन पर्युक्षणं। नवनीताय सन्मुखो भव॥ आदित्यः कपिलो नाम पिंगलः सोम उच्यते
। धूमकेतुस्तथा भौमो नवराग्निर्बुधः स्मृतः। गुरुश्चैव मरवी नाम शुक्रे भवति हाटकः। शनैश्चरे महातेजा रा
हुकेतु हुताशन॥ ॥आ वो देवास ईमहे वामं प्रयत्यध्वरे। आ वो देवास आशिषो यज्ञियासो हवामहे
॥ पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश। वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स
रिषस्पातु नक्तं॥२॥ एषो ह देवः प्रदिशोनु सर्वाः सर्वो ह जातः स उ गर्भे अंतः। स एव जातः स जनिष्यमा
णः प्रत्यङ्जनास्तिष्ठति सर्वतो मुखः॥३॥ न देन हचा स्मुकं नमृषाभ्यां तयदवं ति देवा इतिन हे वैवं डुषः
किंचन घृषाभ्यां तंजवनितयो हास्मेन सर्वदेवा अवंनि॥४॥ वरदनाम्ने वैश्वानराय सन्मुखो भव॥ ॥नव
ग्रहाणां नव समिधः॥ समिदर्कमयी सूर्ये पालाशी शशिनस्तथा। खादिरी भूमिपुत्राय अपामार्गी बुधा
य च। गुरोरश्वत्थजा प्रोक्ता शुक्रस्योदुंबरस्तथा। शमी शनैश्चरे त्येवाराहो दूर्वा प्रकीर्तिता। केतूनां दर्भजा
प्रोक्ता एतैस्समिद्ग्रहणं। अलाभे चैव कर्तव्या पालाशी सर्वदेवता। या उधीति मंत्रेण समिधस्तु समाहरे
त्। अंगुष्ठस्थूला च दीर्घा च सप्ताशीत्या च स्फाटिता। त्वक्हीना कीटविद्धा च न कुर्यात्समिधस्तथा। त्वचाहीना
च साउरवव कोकाय विनाशिनी। अष्टोत्तरं शतं कार्या समिधस्तु ग्रहान् प्रति। अलाविंशतिरष्टौ वा घृतपंचा
मृतप्लुता। अर्को नाशयते व्याधिं पालाशी सर्वकामदा। खादिरी चार्थलाभाय अपामार्गश्च चित्स्मृतः। अश्व ‍१५

त्थो वसुलाभाय उदंवरस्तथा शुभः। शमी शमयते पापं दूर्वा दीर्घायुरेव च। कुशाधर्मार्थकामायरणं रक्षसां
विः॥ आकृष्णेति रविमंत्रः। आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च। हिरण्ययेन सविता र
थेना देवो याति भुवनानि पश्यन्॥ इमं देवेति चंद्रमाः। इमं देवा असपत्नं सुवध्वं महते क्षत्राय महते ज्ये
ष्ठ्याय महते जानराज्यायेंद्रस्येंद्रियाय। इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोमी राजा सोमो
स्माकं ब्राह्मणानां राजा॥२॥ अग्निर्मूर्द्धेति भौमस्य। अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयं
अपां रेतांसि जिन्वति॥३॥ उद्बुध्येति बुधस्य च। उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सं सृजेथामयं
च। अस्मिन्सधस्थे अध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत॥ बृहस्पतीति जीवस्य। बृहस्पते अतियद
र्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रं स्वाहा॥
४॥ शुक्रस्य। अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः। ऋतेन सत्य
मिंद्रियं विपानं शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोमृतं मधु स्वाहा॥६॥ शन्नो देवी शनेर्मंत्रः। शन्नो
देवीरभिष्टय आपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः। स्वाहा॥७॥ कया नश्चित्र राहवे। कया नश्चित्र
आ भुवदूती सदावृधः सखा कया शचिष्ठया वृता स्वाहा॥७॥ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे समुष
द्भिरजायथाः स्वाहा॥८॥ इति नवग्रहाणां मंत्राः समाप्ताः॥ ज्योषाणां स्याधिते मंत्रे होमो व्याहृतिभिः स्त्रिवेः
॥ मुक्तकेशानुरूपाक्षानुपातितबाहुकः। अनुपातितजानूनां राहवे द्वियते हविः। नवग्रहा। नवदेवता

नवअधिदेवता।नवप्रत्यधिदेवता।नवनागाः।पंचलोकपालाः।अष्टाविंशनक्षत्राणि।एकयोगः।एकक
रण।चतुर्दशभुवनादियः।चतुर्वेदाः।दशदिक्पालाः।एतेषां ऋचां नामानि लिख्यंते।ग्रहस्थयं स्तं।१अप्
स्वग्ने।२स्योना पृथिवी।३इदं विष्णु।४माहाइंद्रो।५शुक्रज्योति।६प्रजापते।७आयंगौः।८ब्रह्मयज्ञानं
९॥ ॥त्र्यंबकं।१अग्ने नय।२यदक्रंदा।३विष्णोरराटं।४आब्रह्मन्।५सजोषा इंद्र।६यमाय त्वा।७काषिरसि
।८चित्रावसो।९।सनपिते।१आपो अस्मान्।२चिदसि।३इदं विष्णु।४इंद्राग्नी।५इंद्रं देवा।६प्रजापते
७नमोस्तु नी८ब्रह्मयज्ञानं।९॥ ॥आनो नक्षा।१देवानां नक्षा।२तान्सर्वया।३नक्षो वातो।४नमीशानं।५
स्वस्तिनइंद्रो हदिदा।६षषदस्या।७नइंकर्णेभिः।८ज्ञानमिंतु।९॥ ॥गणानां त्वा।१जातवेदसे।२यायोथेते
॥३॥घृतं घृतपावान्॥४यवांकत्वा।५अग्निना तेजसा।२यमाय त्वा।२अयमग्नि।३ब्रह्मयज्ञानं।सोमो
धेनु।५अदितिर्द्यौ।६वाचस्पतये।७नमोस्तु।८पितृभ्यः।९नगराणेति।१०दैव्यावधर्यु।११पिताद्।१२त्वष्टानु
रिपो।१३पिवोच्छेना।१४।इंद्राग्नि आगतं।१५।नामो मित्रस्य।१६स्प्रुहस्तेः।१७।मानेवपुत्रो।१८अपपथापा।१९
विश्वेअद्यमारुतो।२०नक्षविद्य।२१इदंविष्णु।२२वसोःपवित्रमसि।२३वरुणस्योत्तम्।२४उतनोहि।२५॥शि
वोनामासि स्वधितेवहने।२७।यागेयोगे।२८।नइंकर्णेभिः।१अग्निवोसि।२पंचनद्यः।३समरूपयः।४इमंमे।५प्र
पर्वतस्य।६यवोयस्ते।६सुपर्णोसि।७असंख्याता सहस्र।८सहस्रशीर्षा।९प्रजापते।१०अमीवाहा।११गणा १६
नांत्वा॥१२नमोस्तु।१३जातवेदसे।१४।योवःशिवतमो।१५।अग्निमीले।१इषेत्वोर्ज्जानोदेवि।३अग्नआया

त्रातारमिंद्र।१त्वंनोअग्ने।२मुष्नपर्णा।३अमुंचन।४तत्वायामि।५आनोनियुद्भिः।६वृष।८सोम।७नमी
शीनं।७अस्मेरुद्रा।९एसोमोधेनु।१०मरिस्तवर्तनरूषिविहा।दिक्पालादयो येदेवा येमंत्रैः स्थापितास्तेमं
त्रैर्होमः॥ ॥अथमंत्रसमिधः।आज्यंचरूयवतिलफलहोमः।तंदुलाज्यशतपत्राणि श्रीसूक्तेनलक्ष्मीहोमः।३ कुंड, यक
॥अथश्रीसूक्तेनलक्ष्मीहोममंत्रालिख्यते॥ ॥हिरण्यवर्णांहरिणींसुवर्णरजतस्रजां।चंद्रांहिरण्मयीं
लक्ष्मींजातवेदोममावह॥तांमआवहजातवेदोलक्ष्मीमनपगामिनीं।यस्यांहिरण्यंविंदेयंगामश्वंपु
रुषानहं।अश्वपूर्वांरथमध्यां।हस्तिनादप्रबोधिनीं।श्रियंदेवीमुपह्वये।श्रीर्मादेवीजुषतां।कांसो
स्मितांहिरण्यप्राकारामार्द्रांज्वलंतींतृप्तांतर्पयंतीं।पद्मेस्थितांपद्मवर्णांतामिहोपह्वयेश्रियं।चंद्रां
प्रभासांयशसाज्वलंतींश्रियंलोकेदेवजुष्टामुदारां।तांपद्मामहंशरणंप्रपद्येअलक्ष्मीर्मेनश्यतां
त्वांवृणोमि।आदित्यवर्णेतपसोधिजातोवनस्पतिस्तववृक्षोथबिल्वः।तस्यफलानितपसानुदंतु
मायांतरायाश्चबाह्याअलक्ष्मीः।उपैतुमांदेवसखःकीर्तिश्चमणिनासह।प्रादुर्भूतोस्मिराष्ट्रेस्मिन्की
र्तिमृद्धिंददातुमे।क्षुत्पिपासामलांज्येष्ठामलक्ष्मींनाशयाम्यहं।अभूतिमसमृद्धिंचसर्वांनिर्णुदमेगृहात्।गंध
द्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं।ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं।मनसःकाममाकूतिंवाचःसत्य
मशीमहि।पशूनांरूपमन्नस्यमयिश्रीःश्रयतांयशः।कर्दमेनप्रजाभूतामयिसंभवकर्दम।श्रियंवासयमेगृ
हे।मातरंपद्ममालिनीं।आपःसृजंतुस्निग्धानिचिक्लीतवसमेगृहे।निचदेवींमातरंश्रियंवासयमेगृहे।आर्द्रां
कुले

पुष्करिणींयष्टिंसुवर्णांहेममालिनींसूर्यांहिरण्मयींलक्ष्मींजातवेदोमआवह।।आर्द्रांहिरण्मयींपुष्करिणीं
पुष्टिंपिंगलांपद्ममालिनीं।चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह।तामआवहजातवेदोलक्ष्मीमनप
गामिनीं।यस्यांहिरण्यंप्रभूतंगावोदास्योश्वान्विंदेयंपुरुषानहं।अश्वदायीगोदायीधनदायीमहाधनः।
धनंमेजुषतांदेवीसर्वकामांश्चदेहिमे।पुत्रपौत्रधनंधान्यंहस्त्यश्वादिगवेरथं।प्रजानांभवसिमाता
आयुष्मंतंकरोतुमां।धनमग्निर्धनंवायुर्धनंसूर्योधनंवसुः।धनमिंद्रोबृहस्पतिर्वरुणोधनमश्नुते।वैनतेयसो
मंपिबसोमंपिबतुवृत्रहा।सोमंधनस्यसोमिनोमह्यंददातुसोमिनः।नक्रोधोनचमात्सर्यंनलोभोनाशुभा
मतिः।भवंतिकृतपुण्यानांभक्तानांश्रीसूक्तंजपेत्।पद्माननेपद्मरूपेपद्माक्षीपद्मसंभवे।तन्मेभजसि
पद्माक्षीयेनसौख्यंलभाम्यहं।यःशुचिःप्रयतोभूत्वाजुहुयादाज्यमन्वहं।ऋचःपंचदशार्चश्रीकामः सत
तंजपेत्।श्रीकामःसततंजपइति।श्रीवर्चस्वमायुष्यमारोग्यमाविधात्।पवमानंमहीयतेधान्यंधनंपशुं
पुत्रलाभशतसंवत्सरंदीर्घमायुः।।इतिश्रीसूक्तंसमाप्तं।। ।।गुग्गुलहोमः।। ।।सर्षपहोमः।। ।।अमृतहोमः
।।होमांतेगृहसज्जनं।। ।।अग्नयेस्विष्टकृतयेस्वाहा।।इदमग्नयेस्विष्टकृतये।प्रायश्चित्तं।।भूःस्वाहा।इदमग्न
ये।भुवःस्वाहा।इदंवायवे।स्वःस्वाहा।इदंसूर्याय।त्वन्नोअग्नेस्वाहा।इदमग्नेवरुणाभ्यां।सत्वन्नोअग्नेस्वाहा
इदमग्नेवरुणाभ्यां।अयाश्चाग्नेस्वाहा।इदमग्नेवरुणाभ्यां।येतेशतंवरुणंस्वाहा।इदंवरुणायसवित्रेवि
ष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्योर्कभ्यः।उदुत्तमं।इदंवरुणायादित्यायादितये।।इतिप्रायश्चित्ताहुतयः।।उद्धृत १७

वाधश्रुक्स्रुवौचसमृज्यत्रवेष्टनंप्रथमं।सुमुहूर्त्तेसुलग्नेचतेमंकल्याणमारोग्यंभवतुमेवतु।सर्वाहुतीनां
मृडनाम्नेवैश्वानरायइदमावाहनं।इदमग्नयेअर्चनंस्वाहा।। ।।उचितंजुहोमिमनसाघृतेनयथादेवा
इहागमन्वीतिहोत्राऋतावृधः।पत्येविश्वस्यभूमनोजुहोमिविश्वकर्मणेविश्वाहादाभ्यंहविःस्वाहा।।
१।सप्ततेअग्नेसमिधःसप्तजिह्वाःसप्तऋषयःसप्तधामप्रियाणिसप्तहोत्राःसप्तधात्वायजंतिसप्त
योनिरापृणस्वघृतेनस्वाहा।२।शुक्रज्योतिश्चचित्रज्योतिश्चसत्यज्योतिश्चज्योतिष्मांश्चशुक्रश्चऋतपा
श्चात्यंहाः।३।ईदृङ्चान्यादृङ्चसदृङ्चप्रतिसदृङ्च।मितश्चसंमितश्चसभराः।४।ऋतश्चसत्यश्चध्रुवश्चधरुणश्च
धर्त्ताचविधर्त्ताचविधारयः।५।ऋतजिच्चसत्यजिच्चसेनजिच्चसुषेणश्च।अंतिमित्रश्चदूरेअमित्रश्चग
णः।६।ईदृक्षासएतादृक्षासऊषुणःसदृक्षासःप्रतिसदृक्षासएतन।मितासश्चसंमितासोनो
अद्यसभरसोमरुतोयज्ञेअस्मिन्।७।स्वतवांश्चप्रघासीचसांतपनश्चगृहमेधीचक्रीडी
चशाकीचोज्जेषी।८।उग्रश्चभीमश्चध्वांतश्चधुनिश्चसासह्वांश्चाभियुग्वाचविक्षिपःस्वाहा।९।स
इकल्वरोस्मागः।पुनस्त्वादित्यारुद्रावसवःसमिंधतांपुनर्ब्रह्माणोवसुनीथयज्ञैर्घृतेनत्वंतन्वंवर्धयस्व
सत्याःसंतुयजमानस्यकामाः।१०।इंद्रंदैवीर्विशोमरुतोनुवर्त्मानोभवन्यथेंद्रंदैवीर्विशो
मरुतोनुवर्त्मानोभवन्नेवमिमंयजमानंदैवीश्चविशोमानुषीश्चानुवर्त्मानोभवंतु।११।इम
ंस्तनऊर्जस्वंतंधयापांप्रपीनमग्नेसरिरस्यमध्ये।उत्संजुषस्वमधुमंतमर्वन्समुद्रियंसदनमावि

त्स्वा॥३॥ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतं वस्य धाम। अनुष्वधमावह मादयस्व स्वाहाकृतं वृ
षभ वक्षि हव्यं॥४॥ समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना सममृतत्वमानट्। घृतस्य नाम गुह्यं यदस्ति
जिह्वा देवानाममृतस्य नाभिः॥५॥ वयं नाम प्रब्रवामा घृतस्यास्मिन्यज्ञे धारयामा नमोभिः। उप ब्र
ह्मा शृणवच्छस्यमानं चतुःशृंगोऽवमीद्गौर एतत्॥६॥ चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्ता
सो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश॥७॥ त्रिधा हितं पणिभिर्गु
ह्यमानं गवि देवासो घृतमन्वविंदन्। इंद्र एकं सूर्य एकं जजान वेनादेकं स्वधया निष्टतक्षुः॥८॥ ए
ता अर्षंति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे। घृतस्य धारा अभिचाकशीमि हिरण्ययो वेतसो मध्य
आसां॥९॥ सम्यक्स्रवंति सरितो न धेना अंतर्हृदा मनसा पूयमानाः। एते अर्षंत्यूर्मयो घृतस्य मृगा
इव क्षिपणोरीषमाणाः॥१०॥ सिंधोरिव प्राध्वने शूघनासो वातप्रमियः पतयंति यह्वाः। घृतस्य धा
रा अरुषो न वाजी काष्ठा भिंदन्नूर्मिभिः पिन्वमानः॥११॥ अभि प्रवंत समनेव योषाः कल्याण्यः स्मयमाना
सो अग्निं। घृतस्य धाराः समिधो नसंत ता जुषाणो हर्यति जातवेदाः॥१२॥ कन्या इव वहतुमेतवा
उ अंज्यंजाना अभिचाकशीमि। यत्र सोमः सूयते यत्र यज्ञो घृतस्य धारा अभि तत्पवंते॥१३॥ अभ्यर्षत
सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त। इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवंते॥१४॥
धामंते विश्वं भुवनमधिश्रितमंतः समुद्रे हृद्यंतरायुषि। अपामनीके समिथे य आभृतस्तमश्याम म १९

धुमंतमूर्मिं॥१५॥ ता होवाच वैते वै यूयं पृथक् वैश्वानरान विद्वांसः पृथगन्नमस्तत्वा प्रादेश
मात्रमिव ह वै देवाः॥१॥ सुविदिता अग्निपत्नस्तथा नु वत एतान्वक्ष्यामि यथा प्रादेशमात्रमे
वाभिसंपादयिष्यामीति॥२॥ यत्कर्मणात्यरीरिचं यद्वा न्यूनमिहाकरं। अग्निष्टत्स्विष्टकृद्विद्वां
स्विष्टं सुहुतं करोतु स्वाहेति॥३॥ तेषां वा उभयतो नमस्कारा अग्नेऽन्यतरतो नमस्कारा अग्ने
हैते ते घोरतरा अशांततरा उभयतो नमस्कारा युउभयतए वो नानेन न यज्ञेन नमस्कारेण।
शमयति॥४॥ वैश्वानरसज्ञा॥ ॥चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च। हूयते च पुनर्द्वाभ्यांत
स्मै यज्ञात्मने नमः॥१॥ स्रुक्प्रोक्षितादिकरणं। होमसंकल्पः। आघारादिसर्वाज्यांतपर्यंतयद्
द्रव्यं यावद्यावत्संख्याकं येन येन मंत्रेणाज्यं यथा यथा कामनया यस्मै यस्मै देवतायै सामा
ताप्रियतां। ते देवाः शांतिदाः पुष्टिदा वरदा हविर्दाः संतु। उक्तदानानि लिख्यंते। आदित्ये
धेनुं शंखं सोमाय दापयेत्। भौमस्य रक्तानड्वाहं सोमपुत्राय कांचनं। गुरवे पीतवासांसि शुक्रे
तहयः स्मृतः। मंदाय कृष्णधेनुश्च छागश्च राहवे। केतुभ्यश्च। दानं दद्यात्सर्वेषामेव कांचनं॥
तत्रिक्कियं कृत्विजां यजमानो दास्ये योदक्ष विभागः। आचार्यः प्रथमं सप्तो गजाश्वरथकांच
नैः। ऋत्विजो वै ततः संपूज्याः यथोक्तं च हदक्षिणाः। संपूज्या ब्राह्मणाः सर्वे तत्र तृप्यंति देवता॥ ॥ ॥
संस्रवप्राशनं॥ ॥पवित्रयोर्मार्जनं॥ पवित्रः प्रतिपत्तिः। प्रणीताविमोकः। ऋ२। ... सर्पणं। ब्रह्मानिहा

विष्णुप्रोक्षितः॥ अस्य कर्मणः समृध्यर्थं सर्वपात्रं सुवर्णसहितं ब्रह्मणे [illegible] यदेण
सर्पकुमारिका अयं भोजनेनाहं तर्पयिष्ये॥ तेन धीजं जीतस्यर्थं वह [illegible] जनेनाहिवि
अस्य कर्मन्यूनातिरिक्तदोषपरिहारार्थं निर्विघ्नेन कर्मणां सिद्ध्य[illegible]था संख्याका [illegible]
भोजनेनाहं तर्पयिष्ये॥ अमुष्मी दक्षिणां नानागोत्रेभ्यो ब्राह्मणेभ्यो नानानामभ्यो [illegible]
योयस्य विभागः संप्रतिपृष्टतां॥ ॥ततोऽभिषेकः॥ ॥निवेशावादितैः पुष्पैः सैः कर्तानि [illegible]
आदाय रुद्रकलशं दैवैः सार्द्धं ततो गुरुः॥ पंचांगरुद्रजाप्येन सतिर्ध्यातिप्रदंशनं॥ ग्रहाणामंतं
:कार्योऽभिषेकश्च वरप्रदः॥ उच्चार्य वारुणान्मंत्रान् जलम्भ स्वत्यपत्रकैः॥ उद्धृत्योद्ध्वसंचेतः सप्तु
नेसकलशकं॥ आपोहिष्ठात्रिभिर्मंत्रैः पंचेन्द्रियपंचवारुणं॥ नगप्रणेतिर्दमाप्येनि समुद्रायत्वेति पु
नंतु मा॥ आप्यायस्व पंचनद्येति शिरो मे तिच पंचभिः॥ देवस्य त्वा त्रिभिर्मंत्रैरभिषेकं तु पुनः पुनः॥ मं
त्रा लिख्यंते॥ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे॥१॥ यो वः शिवतमो रसः त
स्य भाजयतेह नः। उशतीरिव मातरः॥२॥ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा
च नः॥३॥ आ नार सिंह॥४॥ वरुणस्य॥ नगप्रणेतिर्नगमन्तराधोमगेनांधियसुदवाददंनः॥ नृगप्र
नोज नयगोमिरश्वैर्गगप्रनृमिर्नृवंतः स्याम॥६॥ इदमापः प्रवहता वद्यं मलं च यत्। यच्चा
भिद्रोहानृतं यच्च शेपे अभीरुणं। आपो मा तस्मादेनसः पवमानश्च मुंचतु॥७॥ समुद्रायत्वा वा

वात्र यदया मह्रहस्यतद्दासान्नाज्मनाषवाय्यसा॥७॥ देवस्य त्वा सवितुर्नमवावनाऽ [illegible]

सत्ते वा [illegible]
तुभ्यं [illegible]

नाय स्वाहा सरिराय त्वा वाताय स्वाहा अनाधृष्टाय त्वा वाताय स्वाहा प्रतिधृष्याय त्वा वाताय स्वाहा अव
स्यवे त्वा वाताय स्वाहा शिमिदाय त्वा वाताय स्वाहा॥८॥ पुनंतु मा देवजनाः पुनंतु मनसा धियः। पुनंतु
विश्वा भूतानि जातवेदः पुनीहि मा॥९॥ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं। भवा वाजस्य संगथे॥
१०॥ पंच नद्यः सरस्वतीमपियंति सस्रोतसः। सरस्वती तु पंचधा सो देशेऽभवत्सरित्॥११॥ शिरो मे श्रीर्यशो
मुखं त्विषिः केशाश्च श्मश्रूणि। राजा मे प्राणोऽमृतं सम्राट् चक्षुर्विराट् श्रोत्रं॥१२॥ जिह्वा मे भद्रं वाङ्महो म
नो मन्युः स्वराड् भामः। मोदाः प्रमोदा अंगुलीरंगानि मित्रं मे सहः॥१३॥ बाहू मे बलमिंद्रियं हस्तौ मे कर्म वी
र्यं आत्मा क्षत्रमुरो मम॥१४॥ पृष्टीर्मे राष्ट्रमुदरमंसौ ग्रीवाश्च श्रोणी ऊरू अरत्नी जानुनी विशो मेंगानि सर्व
तः॥१५॥ नाभिर्मे चित्तं विज्ञानं पायुर्मेऽपचितिर्भसत्। आनंदनंदावांडौ मे भगः सौभाग्यं पसः। जंघाभ्यां
पद्भ्यां धर्मोऽस्मि विशि राजा प्रतिष्ठितः॥१६॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां। सरस्व
त्यै वाचो यंतुर्यंत्रेणाग्नेः साम्राज्येनाभिषिंचामि॥१७॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो
हस्ताभ्यां। अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिंचामि सरस्वत्यै भैषज्येन वीर्याया
भिषिंचामींद्रस्येंद्रियेण बलाय श्रियै यशसेऽभिषिंचामि॥१९॥ स देषां वा देवा एष वे द[illegible]
सम सर्वेषां एवैतमेतदेदानु रसेनाभिषिंचामि॥२०॥ पालाशं भव[illegible] ब्राह्मणेऽभि
वै पालाशो ब्राह्मणेवैनमेतदभिषिंचंति॥२१॥ यदेव कल्याः तु होनि प्राण[illegible]
तेनैवैनमेतदभिषिंचंति॥२२॥ ब्रह्मादिदेवताः सर्वा ब्रह्मविष्णुमहेश्व[illegible]

निच॥२॥नारदाऋषिगणायेंबाल्मेचनपोधनाः॥जवंतुपजमानस्य ... ॥अनंतश्चावि...
यणोजगन्नाथस्तथासंकर्षणोविभुः॥प्रद्युम्नश्चानिरुद्धश्चसर्वदैवतुतान ...
श्चैवनैरृत्योवरुणस्तथा॥वायुःकुवेरोरुद्रश्चदिक्पालाःपांतुनेसदा॥४॥श्री...
बुधोजीवसितार्कजाः॥महाग्रहाः॥मंत्रिषिंचंतुराहुकेतुयुतास्तथा॥५॥आदित्या ...
देवामरुद्गणाः॥लोकपालाःप्रपछंतुमंगलानिश्रियंपराः॥६॥गायत्रीचैवसावित्रीइंद्राणीश्री
ःसरस्वती॥मृडानीमातरःसर्वाभवंतुवरदाःसदा॥७॥ऋग्वेदोथयजु ...ःसामवेदोथ्यर्वणः॥बृ
हस्पतिनानिमंत्रहनंतवशास्त्रवान्॥८॥गंगाद्याःसरितःसर्व ...नानिषकोस्तु॥ ॥तिलकाद्देवांदु
॥ ॥धुःचनागाधन्वनागैंजिंजयेमधननानीञाः॥समदोजये ...ःुः॥शात्रोरपकामंत्रणोतिधन्वनात्से
र्वाप्रदिशोजयेम॥१॥उपुत्रपितरावश्विनोरेंद्रायथुकाव्येदृ८सनाभिःयत्सुरामव्यपिबः॥शचीभिःस
रस्वतीत्वामघवन्नभिष्णुक्॥२॥उकामंकामधुघेधुक्षमित्रायवरुणायच॥इंद्रायाश्विभ्यांपूष्णोप्र
जाभ्यओषधीभ्यः॥अथपूर्वस्मिन्दक्षिणा॥कामदुघेधुक्ष्वमित्रायवरुणायच॥इंद्रायाश्विभ्यां ...ष्णो
प्रजाभ्यओषधीभ्यःइतिसर्वदेवत्यावेलत्तिरेनाभ्योदेवताभ्यःसर्वान्कामान्धुक्ष्व॥३॥उआमच्छद
ग्निरिंद्रोब्रह्मादेवोबृहस्पतिः॥सचेतसोविश्वेदेवायज्ञंप्रावंतुनःशुभे॥अनेनदेवास्तनाविदुर्यथेनाट
सर्वचातुर्थ्येयथानिवारेचयंनवास्यापयन्स्तु॥एनामृचमपरपत्यामच्छदग्निरिंद्रोब्रह्मादेवोबृहस्पतिः
सचेतसोविश्वेदेवायज्ञंप्रावंतुनःशुभे॥४॥उविमकाः२८हवामहेयासोश्चित्रस्यराधसःसवितारंनृच

क्षसमितितदेतत्सर्वमायुर्दीर्घमनंत८हिरण्यदिमा...
रा॥इमरित्येषवैश्रेष्ठोरश्मिर्यत्सूर्यस्तस्मा...
हंत्रवीमितिहस्माहयाज्ञवल्क्यास्तदेव...
दिनेयएवावसंगा...स्पतिगो ... मो...
॥६॥ ॥उविश्वानिदेवःसवितर्दुरितानिपरासुवयद्भद्रं तन्नआसु
निकविधिःसमाप्तः॥ ॥छ॥ ॥श्री॥संवत१७६८वर्षेआश्विन
गोविंदेन॥ ॥श्रीरस्तु॥ ॥ ॥

256